# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-२(SEM-4) | **प्रश्नपत्रम्** - ४ | **गुणाः** - ७० |
| **विषयः** - साहित्यम् (नाट्यवर्गः) | **कोड- CC- 5412(4)** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ०२/०४/२०१९ | **सन्दर्भग्रन्थः**- नाट्यदर्पणम् (३-४विवेकौ) | |

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ निम्नलिखितयोरेकं ससन्दर्भं स्पष्टयतु ।** ०५

१. स्थायीभावः श्रितोत्कर्षो विभावव्यभिचारिभिः ।
स्पष्टानुभावनिश्चेयः सुखदुःखात्मको रसः ॥

२. स्त्री-पुंस-काव्य-गीतर्तुमाल्यवेषेष्टकेलिजः ।
अभिनेयः स चोत्साह-चाटुतापाश्रुमन्युभिः ॥

**प्रश्नः २ नाट्यदर्पणानुसारं नाट्यवृत्तीः सविस्तरं स्पष्टयत ।** १०

अथवा

**हास्यरसस्य निरूपणं कुरुत ।**

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ निम्नलिखितयोरेकं ससन्दर्भं स्पष्टयतु ।** ०५

१. चापलं साहसं रागद्वेषादेः स्वैरिताऽऽदिमत् ।
आवेगः सम्भ्रमोऽतर्क्याद् विकर्ताऽङ्गमनोगिराम् ॥

२. वेपथु-स्तम्भ-रोमाञ्चाः स्वर-भेदोऽश्रु मूर्छनम् ।
स्वेदो वैवर्ण्यमित्याद्या अनुभावा रसादिजाः ॥

**प्रश्नः ४ व्यभिचारिभावानां नामानि विलिख्य, निर्वेद-ग्लानि-चिन्ता-स्मृति-मोहान् ग्रन्थोक्तदिशा वर्णयत ।** १०

अथवा

**अभिनयभेदान् स्पष्टयत ।**

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ निम्नलिखितयोरेकं ससन्दर्भं स्पष्टयतु ।** ०५

१. लज्जावती मृदुर्धीरा गम्भीरा स्मितहासिनी ।
विनीता कुलजा दक्षा वत्सला योषिदुत्तमा ॥

२. सहायिन्यस्तु धात्रेयी लिङ्गिनी प्रातिदेशिकाः ।
शिल्पिनी चेटिका सख्यो गुप्ता दक्षा मृदु-स्थिराः ॥

**प्रश्नः ६ नायिकायाः लक्षणं भेदान् च वर्णयन्तु ।** **१०**

अथवा

**का नाम ध्रुवा? तस्याः भेदान् विवेचयन्तु ।**

## ॥ चतुर्थान्वितिः ॥ (Unit-4)

**प्रश्नः ७ निम्नलिखितयोरेकं ससन्दर्भं स्पष्टयतु ।** **०५**

१. बालषण्ढग्रहग्रस्त–मत्तस्त्रीरूपयोषिताम् ।
प्राकृतेनोत्तमस्यापि दारिद्र्यैश्वर्यमोहिनः ॥

२. आर्येति शब्द्यते पत्नी लिङ्गिनो ब्राह्मणी द्विजैः ।
अम्बापि जननी वृद्धे पूज्या तु भवतीत्यपि ॥

**प्रश्नः ८ नाट्ये भाषा–प्रयोगविषये चर्चा कार्या ।** **१०**

अथवा

**नाट्यप्रयोगे पुरुषपात्राणां संबोधनविषये वर्णनं कुर्वन्तु ।**

**प्रश्नः ९ केषाञ्चित् दशप्रश्नानाम् उत्तराणि एकैकवाक्येन देयानि ।** **१०**

१. नाट्यदर्पणकर्तारौ कौ?
२. नाट्यदर्पणे कति विवेकाः सन्ति?
३. शृङ्गारः कतिविधः?
४. तृतीयविवेके कति कारिकाः सन्ति?
५. अपस्मारस्य लक्षणं किम्?
६. त्रासस्य लक्षणं किम्?
७. नायकस्य गुणानां वर्णनं कुर्वन्तु ।
८. प्रतिनायकस्य लक्षणं लिखन्तु ।
९. आर्येति सम्बोधनं कस्यै प्रयुज्यते?
१०. 'भट्टिनी' इति कस्यै प्रयुज्यते?
११. नाट्यप्रयोगे स्त्रीपात्राणां भाषा का भवति?
१२. शान्तरसस्य लक्षणं किम्?
१३. नाट्यदर्पणानुसारं नान्दीलक्षणं लिखन्तु ।
१४. नाट्यदर्पणस्य चतुर्थविवेकस्य नाम किम्?
१५. नाट्यदर्पणकर्त्रोः गुरुः कः?

०००